पद्मोत्तरात्मजः। स तु द्वादशजिनचक्रवर्त्त्यन्तर्गतचक्रवर्त्तिविशेषः। बलदेवः। इति हेमचन्द्रः। षोड़शरतिबन्धान्तर्गतप्रथमबन्धः। यथा,—

"हस्ताभ्याञ्च समालिङ्ग्य नारीं पद्मासनोपरि।
रमेद्गाढ़ं समाकृष्य बन्धोऽयं पद्मसंज्ञकः॥"

इति रतिमञ्जरी॥

पद्मकं, क्ली, (पद्ममिव कायतीति। पद्म+कै+कः। पद्मप्रतिकृतिरक्तवर्णत्वात् तथात्वम्।) बिन्दुजालम्। गजस्य मुखादिस्थो बिन्दुसमूहः। इत्यमरभरतौ॥ (यथा, कुमारे। १। ७ श्लोकटीकायां मल्लिनाथः। "अतएव कुञ्जरस्य ये बिन्दवः काये वयोविशेषभाविनः पद्मकाख्याः।) पद्मकाष्ठम्। इति मेदिनीधरण्यौ॥ (यथा, गारुड़े १६८ अध्याये।

"कर्पूरकः पद्मकञ्च एतैस्तैलं प्रसाधितम्।
प्रस्वेदमलदौर्गन्ध्यकण्डुकुष्ठहरं परम्॥"

अस्य गुणा यथा, भावप्रकाशे।

"पद्मकं तुवरं तिक्तं शीतलं वातलं लघु।
विसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तहृत्।
गर्भसंस्थापनं रुच्यं वमिव्रणतृषाप्रणुत्॥")

कुष्ठम्। इति राजनिर्घण्टः॥

पद्मकन्दः, पुं, (पद्मस्य कन्दः।) कमलकन्दः। तत्पर्य्यायः। शालूकम् २ पद्ममूलम् ३ कटाह्वयम् ४ शालुकम् ५ जलालूकम् ६। अस्य गुणाः। कटुत्वम्। विष्टम्भित्वम्। रूक्षत्वम्। रुच्यत्वम्। कषायत्वम्। कफपित्तकासतृष्णादाहविनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"पद्मादिकन्दः शालूकं करहाटश्च कथ्यते।
मृणालमूलं भिसाण्डं जलालूकञ्च कथ्यते॥
शालूकं शीतलं वृष्यं पित्तदाहास्रनुद्गुरु।
दुर्जरं स्वादुपाकञ्च स्तन्यानिलकफप्रदम्॥
संग्राहि मधुरं रूक्षं भिसाण्डमपि तद्गुणम्॥"

इति भावप्रकाशः॥

पद्मकाष्ठं, क्ली (पद्ममिव गन्धवत् काष्ठम्।) औषधिविशेषः। तत्पर्य्यायः। पद्मकम् २ पीतकम् ३ पीतम् ४ मालयम् ५ शीतलम् ६ हिमम् ७ शुभम् ८ केदारजम् ९ रक्तम् १० पाटलापुष्पसन्निभम् ११ पद्मवृक्षम् १२। अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। रक्तपित्तविनाशित्वम्। मोहदाहज्वरभ्रान्तिकुष्ठविस्फोटशान्तिकारित्वञ्च। इति राजनिर्घण्टः॥ अपि च भावप्रकाशे।

"पद्मकं पद्मगन्धि स्यात्तथा पद्माह्वयं स्मृतम्।
पद्मकं तुवरं तिक्तं शीतलं वातलं लघु॥
विसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तहृत्।
गर्भसंस्थापनं रुच्यं वमिव्रणतृषाप्रणुत्॥"

इति भावप्रकाशः॥

पद्मकी [न्,] पुं, (पद्मकं बिन्दुजालमस्त्यस्य। इनिः।) भूर्ज्जवृक्षः। इति शब्दमाला॥

पद्मकेशरः, पुं क्ली, (पद्मस्य केशरः।) किञ्जल्कः। इति राजनिर्घण्टः॥ (यथा, इन्द्रजालसंग्रहे। "गोक्षीरैः पेषयेत्तुल्यं पद्मकेशरचन्दनम्॥")

पद्मगन्धं, पद्मगन्धि, त्रि, (पद्मस्येव गन्धोऽस्य। "उपमानाच्च।" ५।४।१३६। इति इत्। मुग्धबोधमते तु वातूपमानादिलुक्तेर्विभाषा।) पद्मस्येव गन्धो यस्य तत्। इति मुग्धबोधव्याकरणम्॥

पद्मगर्भः, पुं, (पद्मं गर्भः कुक्षिरिव यस्य। विष्णुनाभिकमलजातत्वात् तथात्वम्।) ब्रह्मा। इति शब्दरत्नावली॥ (पद्मस्य हृदयस्थपद्मस्य गर्भे आसनत्वेन कल्पितो यस्य उपासकैरिति शेषः। विष्णुः। यथा, महाभारते। १३।१४९।५१।

"पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत्॥"
"पद्मस्य हृदयाख्यस्य मध्ये उपास्यत्वात् पद्मगर्भः।"

इति भाष्यम्॥

शिवः। यथा, तत्रैव १३।१७।१३२।

"पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः॥")

पद्मचारिणी, स्त्री (पद्ममिव चरतीति। चर+णिनिः स्त्रियां ङीप्॥) उत्तरापथभवस्वनामख्यातवृक्षविशेषः। (स्थलकमलिनी इति ख्याता॥) तत्पर्य्यायः। अव्यथा २ अतिचरा ३ पद्मा ४ चारटी ५। इत्यमरः। २। ४। १४६॥ अस्याः पर्य्यायान्तरं गुणाश्च स्थलपद्मिनीशब्दे द्रष्टव्याः॥

पद्मतन्तुः, पुं, (पद्मस्य तन्तुः।) मृणालम्। इति राजनिर्घण्टः॥

पद्मदर्शनः, पुं, (पद्मस्येव दर्शनमस्य।) श्रीवासः। इति शब्दचन्द्रिका॥ लोवान् इति भाषा॥

पद्मनाभः, पुं, (पद्मं नाभौ यस्य। "अच्प्रत्यन्वव पूर्व्वात् सामलोम्नः।" ५। ४। ७५। इत्यत्र "अच्" इति योगविभागादच्। ब्रह्मोत्पत्तिकारणीभूतपद्मस्य नाभिजातत्वादस्य तथात्वम्।) विष्णुः। इत्यमरः। १। १। १०॥ (यथा, महाभारते। १३। १४९। १९॥

"अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः॥")

शयने तस्य स्मरणीयत्वं यथा,—

"औषधे चिन्तयेद्विष्णुं भोजने च जनार्द्दनम्।
शयने पद्मनाभञ्च विवाहे च प्रजापतिम्॥"

इत्यादि बृहन्नन्दिकेश्वरपुराणम्॥

(हृदयपद्मस्य नाभौ नाभेरीषदुपरिभागे प्रकाशनात् महादेवः। यथा, महाभारते। १३। १७। १०५।

"पद्मनाभो महागर्भश्चन्द्रवक्त्रोऽनिलोऽनलः॥"

पद्ममिव वर्त्तुलाकृतिः नाभिर्यस्य। धृतराष्ट्रपुत्राणामन्यतमः। यथा, महाभारते। १।६७।९५।

"ऊर्णनाभः पद्मनाभस्तथा नन्दोपनन्दकौ॥"

नागविशेषः। यथा, तत्रैव। १२। ३५५। ४।

"कृताधिवासो धर्म्मात्मा तत्र चक्षुःश्रवा महान्।
पद्मनाभो महानाभः पद्म इत्येव विश्रुतः॥")

भाविजिनविशेषः। इति हेमचन्द्रः॥ (स्तम्भनास्त्रविशेषः। यथा, गोः रामायणे १।३१।७।

"पद्मनाभो महानाभः सुनाभो दुन्दुभिस्वनः॥")

पद्मनाभिः, पुं, (पद्मं नाभौ यस्य। अजिति योगविभागस्य असार्व्वत्रिकत्वात् न अच्।) पद्मनाभः। इति द्विरूपकोषः॥

पद्मनालं, क्ली, (पद्मस्य नालम्।) मृणालम्। यथा,

"कर्णिका पद्मनालन्तु मृणालं तन्तुलं बिसम्॥"

इति हेमचन्द्रः। ४। २३१॥

पद्मपत्रं, क्ली, (पद्मस्य पत्रमिव। पद्मपर्णसादृश्यादस्य तथात्वम्।) पुष्करमूलम्। इत्यमरः। २। ४। १४५॥ (यथा, सुश्रुते चिकित्सितस्थाने ५ अध्याये। "शैवलपद्मकपद्मपत्रप्रभृतिभिः॥"*॥ पद्मस्य पत्रम्।) कमलदलम्॥ (यथा, हठयोगदीपिकायाम्। २। ७०।

"अन्तः प्रवर्त्तितोदारमारुतापूरितोदरः।
पयस्यगाधेऽपि सुखात् प्लवते पद्मपत्रवत्॥")

पद्मपर्णं, क्ली, (पद्मस्य पर्णं पत्रम्।) पद्मपत्रम्। पुष्करमूलम्। इत्यमरटीका॥

पद्मपलाशलोचनः, पुं, (पद्मस्य पलाशे पत्रे इव लोचने यस्य। पद्मपुष्पदलाकारचक्षुर्विशिष्टत्वात्तथात्वम्।) विष्णुः।। यथा,—

"नान्यं ततः पद्मपलाशलोचनाद्-
दुःखच्छिदन्ते मृगयामि कञ्चन।
यो मृग्यते हस्तगृहीतपद्मया-
श्रियेतरैरङ्ग! विमृग्यमाणया॥"

इति श्रीभागवते ४ स्कन्धः॥

पद्मपाणिः, पुं, (पद्मं पाणौ यस्य।) ब्रह्मा। इति शब्दरत्नावली॥ बुद्धः। सूर्य्यः। इति त्रिकाण्डशेषः॥ (पद्महस्तके त्रि॥)

पद्मपुष्पः, पुं, (पद्ममिव पुष्पमस्य।) कर्णिकारवृक्षः। पिकाङ्गपक्षी। इति शब्दचन्द्रिका॥

पद्मप्रभः, पुं, (पद्मस्येव प्रभा दीप्तिर्यस्य।) चतुर्विंशतिवृत्तार्हदन्तर्गतषष्ठार्हन्। इति हेमचन्द्रः॥ पद्मतुल्यप्रभायुक्ते त्रि॥

पद्मप्रिया, स्त्री, (पद्मानि प्रियाणि यस्याः।) जरत्कारुमुनिपत्नी। मनसादेवी। इति शब्दरत्नावली॥ (गायत्त्रीरूपा महादेवी। यथा, देवीभागवते। १२। ६। ६४।

"पद्मप्रिया पद्मसंस्था पद्माक्षी पद्मसम्भवा॥")

पद्मबन्धः, पुं, (पद्मस्येव बन्धो रचना यस्य।) चित्रकाव्यविशेषः। शब्दालङ्कारभेदः। यथा,

"पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते।"

अस्य च तथाविधसन्निवेशवशेन चमत्कारविधायिनामपि वर्णानां तथाविधश्रोत्राकाशसमवायविशेषवशेन च चमत्कारविधायिभिर्वर्णैरभेदेनोपचारत्वाच्छब्दालङ्कारत्वम्। उदाहरणं यथा, साहित्यदर्पणे॥

"मारमा सुषमा चारु रुचा मार वधूत्तमा।
मात्त धूर्त्ततमा वासा सा वामा मेऽस्तु मा रमा॥"

अत्र पद्मदलेषु वर्णविन्यासक्रमः॥

